No. 2136. पाद्मपुराणम्.
PĀDMAPURĀṆAM.

Substance, palm-leaf. Size, 19⅝ × 1⅝ inches. Pages, 340. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Adhyāyas 29 to 61 in the Uttarakhaṇḍa.

No. 2137. पाद्मपुराणम्.

PĀDMAPURĀṆAM

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 62. Lines, 6 on a page. Character, Kanarese. Condition, good. Appearance, old.

Adhyāyas 30 to 35 in the Uttarakhaṇḍa.

No. 2138. पाद्मपुराणसूचिका.

PĀDMAPURĀṆASÚCIKĀ.

Pages, 121. Lines, 23 on a page.

Begins on fol. 236*a* of the MS. described under No. 1109.

This gives the contents of the Bhūkhaṇḍa, the Pauṣkarakhaṇḍa and the Pātālakhaṇḍa.

Beginning :

प्रथममृषीणां सूतस्य च संवादः, सूतोत्तरञ्च, तत्र व्यासब्रह्मणोस्संवादे प्रह्लादस्य जननमारभ्य तत्प्रभावप्रशंसाकथनं, तत्र शिवधर्मणो ब्राह्मणस्य वृत्तान्तकथनं, तस्य पुत्रेण यज्ञधर्मणा [पुत्रेण] मृतां स्वमातरमुद्दिश्यास्मन्माता त्वेऽपि (क्वेति पृष्टे) शिवधर्मणादेहत्यागपूर्वकं लोकान्तरगमनं कृत्वा मातरं पश्येत्युक्ते तथा कृत्वा पुनरागतवानिति कथनं, पुनश्चान्यं पुत्रमाहूय मद्भार्यां तव मातरं मत्सन्निधिं प्रापयेति कथनं, पुत्रेण वेदशर्मणा तथा कृत्वा मात्राह्वानप्रशंसा, तत्र तया पतित्वे पुत्रस्यैव वरणं, तदा पुत्रेण तन्निषिध्य पुनराह्वानं, तत्र स्वप्रभावदर्शनं, मातुः तद्वाकचगर्हणञ्च, तदा मातुः प्रत्ययार्थं सर्वदेवाह्वानं, तस्य आज्ञया तत्र देवैर्वरप्रदाने पितृभक्तेरेव वेदशर्मणा वरणं, ततो मात्रा स्वशिरोयाचनं, तेनोत्कृत्य शिरःप्रदानं मातुः, ततस्तच्छिर आदाय पतिशिवधर्माणं प्राप्य मम पुत्रेण त्वदर्थं शिरो दत्तमिति शिरःप्रदर्शनं, तच्छ्रुत्वा तद्भ्रातृभिः श्लाघनं, पितुरुल्लासनञ्चेति कथनं, मृतभार्याप्राप्तिश्चेति कथनम् ।

End:

अत्र माघस्नानकर्तॄणां नियमकथनं, तैः कर्तव्यान्नदानप्रभृतिसर्वदान-कथनं, तन्नियमतन्माहात्म्यकथनं, पुराणवक्तुः पूजाप्रकारकथनं, माहात्म्य-श्रवणपठनफलकथनञ्च, माघपुराणनिगमनकथनञ्च, माघमाहात्म्यश्रवणानन्तरं तत्पुस्तकपूजाक्रमोदाहरणम् ॥

Colophon:

इति पद्मपुराणोत्तरखण्डोक्तमाघमाहात्म्यसूचिका समाप्ता ॥

No. 2139. बृहन्नारदीयपुराणम्.

BṚHANNĀRADĪYAPURĀṆAM.

Substance, palm-leaf. Size, 18 × 1¾ inches. Pages, 196. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in the 38th Adhyāya.

This is a Mahāpurana in 38 chapters, described in detail in Aufrecht's Bodleian Library Catalogue No. 47.

Beginning:

वन्दे सेवितमन्दारमानन्दं यादवाम्बुधेः ।
तं नन्दजनसन्दोहानन्दं शंदं यदोस्सुतम् ॥

* * * *

सूतः—

शौनकाद्या महात्मानोरु(न ऋ)षयो ब्रह्मवादिनः ।
नैमिशाख्ये महारण्ये तपस्तेपुर्मुमुक्षवः ॥
जितेन्द्रिया जिताहाराः सन्तस्सत्यपरायणाः ।
यजन्तः परया भक्त्या विष्णुमाद्यं जगद्गुरुम् ॥

* * * *

कानि क्षेत्राणि पुण्यानि कानि तीर्थानि भूतले ।
कथं पापस्य वै मुक्तिर्नृणां वै पापचेतसाम् ॥
कथं हरौ मनुष्याणां भक्तिरव्यभिचारिणी ।

केन प्रसिध्यति फलं कर्मणा त्रिविधात्मना ॥
इत्येवं प्रष्टुमात्मानमुद्यतान्प्रेक्ष्य शौनकः ।
प्राञ्जलिर्वाक्यमाहेदं विनयावनतस्सुधीः ॥

शौनकः—

अस्ति सिद्धाश्रमे पुण्ये सूतः पौराणिकोत्तमः ।
यजन्मखैर्बहुविधैर्विश्वरूपं जनार्दनम् ॥
स एतदखिलं वक्ति व्यासशिष्यो यतो मुनिः ।
पुराणसंहितावक्ता शान्तो वै रो(रौ)मह्षर्णिः ॥

No 2140. बृहन्नारदीयपुराणम्.

BṚHANNĀRADĪYAPURĀṆAM.

Substance, palm-leaf. Size, $11\frac{1}{4} \times 1\frac{1}{3}$ inches. Pages, 332. Lines, 6 on a page. Character, grantha. Condition, injured. Appearance, old.

Adhyāyas 1 to 38.

Complete.

End:

एतत्पवित्रमारोग्यं न वाच्यन्त्वकृतात्मनाम् ।
नी।चासनमतास्सर्वे श्रृणुयादिदमुत्तमम् ॥
एतत्पुराणश्रवणमिहामुत्र फलप्रदम् ।
वदतां श्रृण्वतां सद्यः सर्वपापप्रणाशनम् ॥
सङ्गाद्वा यदि वा मोक्षाद्ये श्रृण्वन्तीदमुत्तमम् ।
ते सर्वे पापनिर्मुक्ताः प्रयान्ति परमाङ्गतिम् ॥

Colophon:

इति श्रीबृहन्नारदीये अष्टात्रिंशोऽध्यायः ॥

श्रीबृहन्नारदीयं संपूर्णम् ॥

No. 2141. ब्रह्मवैवर्तपुराणम्.

BRAHMAVAĪVARTAPURĀṆĀM.

Substance, paper. Size, $12\frac{1}{8} \times 9\frac{3}{4}$ inches. Pages, 240. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 30.

Begins on fol. 112*b*. The other works herein are Śivapurāṇam 1*a*, Hārītasmṛtiḥ 354*a*.

This is one of the 18 Mahāpurāṇas, and is described by Aufrecht in his Bodleian Library Catalogue to contain 4 Khaṇḍas, viz, Brahma, Prakṛti, Gaṇēsa and Kṛṣṇa Khaṇḍas; this copy contains the 30 Adhyāyas wherein Śaṅkara relates to Pārvati the greatness of Viṣṇu.

Beginning:

श्रीपार्वत्युवाच—

महादेव महाभाग नारदाद्या महर्षयः ।
जीवन्मुक्तिमवापुस्ते परमेश्वरभक्तितः ॥
प्राक् त्वन्मुखाम्बुजाच्छ्रुत्वा स्वयंव्यक्तस्थलादिकम् ।
सर्वपापहरं दिव्यमस्ति लोके सुपावनम् ॥
श्रीरङ्गमाद्यं श्रीमुष्णं नैमिशं पुष्करं परम् ।
सालग्रामाद्रिस्तोताद्रिर्वेङ्कटाद्रिर्मनोरमः ॥
नरनारायणावासो दिव्यो बदरिकाश्रमः ।
यक्षगन्धर्वगरुडकिन्नरोरगसेवितः ॥
एते ह्यष्ट स्वयंव्यक्ता भूलोके सन्ति शङ्कर ।
एतेषां चरितं वक्तुं त्वमर्हसि ममाऽधुना ॥
पुरा स्वयंव्यक्त इति तोताद्रिश्श्रेष्ठ उच्यते ।
त्वयेदानीं तच्चरितं सम्यग्वद सविस्तरम् ॥
अद्याहं श्रोतुमिच्छामि रमाधीश्वरभक्तितः ।

मय्यस्ति(त्व)त्कृपा शर्व मां पालय जगद्धित[म्] ॥
त्रिपाद्विभूतिनिलयादागत्याभाति कीदृशः ।

End :

आनन्दामृतसंयुक्ता नृसिंहपदभक्तिगाः ।
गमिष्यन्त्यपवर्गाय नृसिंहस्य कटाक्षतः ॥
न वक्तव्यं न वक्तव्यं विकल्पोपहतात्मने ।
नित्ययुक्ताय लोकाय वाच्यं विश्वसितात्मने ॥

Colophon:

इति श्रीब्रह्मकैवर्ते भवानीशङ्करगीतायां परतत्त्वनिरूपणयोगो नाम त्रिंशोऽध्यायः ॥

The colophons of the Adhyāyas give the following as the contents of the various chapters.

१ नमुचिमर्दनम्.
२ तोताद्रिवर्णनम्.
३ मुक्त्यद्रिवर्णनम्.
४ धर्माद्रिवर्णनम्.
५ Do.
६ मङ्गलाद्रिवर्णनम्.
७ Do.
८ Do.
९ मङ्गलाद्रिमाहात्म्यम्.
१० लक्ष्मीकल्याणसरोवर्णनम्.
११ Do.
१२ Do.
१३ कीटतीर्थवर्णनम्.
१४ चक्रतीर्थवर्णनम्.
१५ वटतीर्थवर्णनम्.
१६ वटतीर्थवर्णनम्.
१७ मुक्तितीर्थवर्णनम्.
१८ Do.
१९ तीर्थदानवर्णनम्.
२० दीपसंस्थापनवैभवम्.
२१ मुक्तिविभागनिर्णयः.
२२ नृसिंहनित्यार्चनाविधिः.
२३ नवाह्निकवर्णनोपक्रमणम्.
२४ मदनोत्पत्तिकथनम्.
२५,२६ नवाह्निकवर्णनम्.
२७ पल्लवोत्सववर्णनम्.
२८ चातुर्मास्योत्सववर्णनम.
२९ प्रपन्नोत्सववैभववर्णनम्.
३० परतत्त्वनिरूपणयोगः.

No. 2142. ब्रह्मवैवर्तपुराणम्.

BRAHMAVAIVARTAPURĀṆAM.

Substance, palm-leaf. Size, 18⅝ × 5⅝ inches. Pages, 149. Lines, 9 on a page. Character, Grantha. Condition, slightly injured Appearance, old.

Begins in the course of the first Adhyāya and ends with the 39th Adhyāya.

This does not coincide with the work described under the last number.

Beginning :

* * * *

. . . . . तपोदानानि कानि च ।
तेषामेतस्य काले वस्त्याज्यं ग्राह्यं भवेन्नु किम् ॥
इमं प्रश्नं परिब्रूहि कृपालो दीनवत्सल ।
अभयन्तव चास्माकं तस्मात्प्रश्नान्करोम्यहम् ॥

* * * *

संसारक्लेशहीनस्स्यान्नान्यतो नान्यतो विभो ।

Colophon :

इति श्रीब्रह्मकैवर्ते पुराणरहस्ये शौनकप्रश्ने प्रथमोऽध्यायः ॥

सूतः—

साधु साधु महाभाग साधु साधु महामते ।
साधु साधु द्विजवर साधु साधु मम प्रिय ॥
दृष्टा हि वहवो (लोके) ब्राह्मणा ब्रह्मवादिनः ।
न शौनक त्वत्समोऽस्ति धर्मश्रवणलोलुपः ॥
श्रोता यथा स्यान्निष्ठावान् तदा वक्तुर्भवेत्फलम् ।
परितोषस्तथैव स्याद्वाचस्स्फूर्तिर्भवेत्तदा ॥
वक्ष्याम्यहमिदानीन्ते परिप्रश्नस्य चोत्तरम् ।
ममापि जन्मसार्थक्यं भवेद्युष्मत्प्रसादतः ॥

End:

घोरं कलियुगं प्राप्य सेव्या भागवता द्विजाः ।
तत्सङ्गाद्भगवद्भक्तिर्वर्धते च दिनेदिने ॥
तथा भक्त्या कलिं जित्वा शक्तो भवति मानवः ।
तस्य तद्वचनं श्रुत्वा स राजा तां मतिं जहौ ॥
ब्राह्मणानर्चयामास हरिपादैकसंश्रयान् ।
कर्मणा तेन स ययौ विष्णोस्स्थानं महाद्भुतम् ॥

Colophon:

इति श्रीब्रह्मकैवर्ते पुराणरहस्ये एकोनचत्वारिंशोऽध्यायः ॥

No. **2143.** ब्रह्मवैवर्तपुराणम्.

BRAHMAVAIVARTAPURĀṆAM.

Substance, paper. Size, 15¾ × 8⅜ inches. Pages, 186. Lines, 25 on a page. Character, Telugu. Condition, injured. Appearance, old.

As the leaves are very fragile, the exact extent of the work to be found herein cannot be made out.

No. **2144.** ब्रह्मवैवर्तपुराणम्.

BRAHMAVAIVARTAPURĀṆAM.

Substance, palm-leaf. Size, 17⅜ × 1⅜ inches. Pages, 40. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Kṣētrakhaṇḍa, Adhyāyas 70 to 76, complete; 77th incomplete.

Beginning:

श्रीशौनकः—

सूत सूत महाभाग पुराणपठने रत ।
पुरा तु नैमिशक्षेत्रे सत्रान्ते मुनिसङ्कुले ॥
ब्रह्मर्षिगणसंयुक्ते देवर्षिगणसंयुते ।

नानालङ्कारसंयुक्ते यूपस्तम्भैरलङ्कृते ॥
सतताध्वरसञ्जातयूपस्तोमवितानिते ।
आवाहितेन्द्रप्रमुखे वेदध्वनिपवित्रिते ॥
आश्रावयादिशब्दैश्च पूर्यमाणदिगन्तरे ।
कथाप्रसङ्गे भवता लोकोपकृतिशालिना ॥
काशीपुर्याश्च माहात्म्यं तत्समानन्तथैव च ।

* * * *

तन्मध्ये च प्रसङ्गेन पश्चिमालकवैभवम् ।
कथितं सङ्ग्रहेणैव कुत्र तत्पश्चिमालकम् ।
कस्य पश्चिमभागे च वर्तते सालका पुरी ॥

* * * *

Colophon :

इति ब्रह्मकैवर्ते महापुराणे उत्तरखण्डे विजयापुरीमाहात्म्ये सप्ततितमोऽध्यायः ॥

सूतः—

इति श्रुत्वा च तद्वाक्यं शिवपूजाप्रसक्तधीः ।
अन्विष्यमाणः तत्स्थानं दक्षिणाभिमुखो ययौ ॥

* * * *

शौनक मुनिवर्य मुक्तिकामिन् कथमिदन्तव मुक्तये द्विजेन्द्र ।
त्वमपि कुरुष्व निवासमात्रमत्र जनमध्ये तदिदं न जातु वाच्यम् ॥

Colophon :

इति ब्रह्मकैवर्तके महापुराणे उपरिभागे क्षेत्रखण्डे अलकापुरीमाहात्म्ये पश्चिमारुणाचलमाहात्म्ये अमृतलिङ्गमाहात्म्यं नाम षट्सप्ततितमोऽध्यायः ॥

शौनकः—

अङ्गदेशस्थितो विप्रः कथं मुक्तिमवाप सः ।
किञ्चकार स्थले चास्मिन् केनेदं ज्ञापितं स्थलम् ॥

End:

एकाहस्नानमात्रन्तु फलं वक्तुं न शक्यते ।
पञ्च सप्त दिनं वापि चन्द्रवद्वर्धते फलम् ॥
अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनाम् ।

No. **2145.** ब्रह्माण्डपुराणम्.

BRAHMĀṆḌAPURĀṆAM.

Substance, paper. Size, $11\frac{7}{8} \times 7\frac{3}{4}$ inches. Pages, 614. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, new.

There are three Pādas in the work, namely, Prakriyāpāda, Upōdghātapāda and Ānuṣaṅgapāda.

Here, the first Pāda has Adhyāyas 1 to 5; the third Pāda has 6 to 28 and 60 to 98 Adhyāyas, and the second Pāda has 1 to 20 Adhyāyas.

Beginning:

. . . च पृथक्त्वञ्च विशेषश्चैव कीर्त्यते ।
ईशत्वाच्च यथाशक्त्या जया देवाश्च यं सुताः ॥

मनुप्रवाहे मरुतं दित्यां दिव्याञ्च संभवः ।
कीर्त्यते मरुताञ्चात्र गणास्ते सप्तसप्तकाः ॥

देवत्वमिन्द्रवाक्येन वायुस्कन्धेषु याश्रयः ।
दैत्यानां दानवानाञ्च यक्षगन्धर्वरक्षसाम् ॥

सर्वभूतपिशाचानां पशूनां पक्षिवीरुधाम् ।
उत्पत्तयः साप्सरसः कीर्त्यन्ते बहुविस्तराः ॥

मार्ताण्डयोगकृतं जन्मैरावतहस्तिनाम् ।
वैनतेयसमुत्पत्तिस्तथा राज्याभिषेचनम् ॥

भृगूणां विस्तरश्चोक्तः तथा चाङ्गीरसामपि ।
कश्यपस्य पुलस्त्यस्य तथैवात्रेर्महात्मनः ॥

End

एवंप्रभावो रामोऽसौ सगरश्च महीपतिः ।
यस्य पुत्रैरयं खण्डो भारतोऽब्धौ निपातितः ॥
योजनानां सहस्रन्तु वर्धते च महोदधिः ।
रामेण तु पुनस्स्पृष्टं योजनानान्तु षट् शतन् ॥
सगरस्य सुतैर्यस्माद्वर्धितो मकरालयः ।
ततःप्रभृति लोकेषु सागरत्वमवाप्तवान् ॥
एतत्ते विहितं सम्यक् महतश्चरितं मया ।
रामस्य कार्तवीर्यस्य सगरस्य महीपतेः ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे मध्यमभागेऽष्टनवतितमोऽध्यायः ॥

Copying said to have been completed on the 8th May 1836 by Catti Rāmācārya and Vāraṇāsi Rāmasvami.

No. 2146. ब्रह्माण्डपुराणम्.

BRAHMĀṆḌAPURĀṆAM.

Substance, paper. Size, $11\frac{3}{4} \times 6\frac{1}{2}$ inches. Pages, 264. Lines, 19 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Same as the above.

This seems to be the original from which the MS. described under No. 2145 must have been copied.

No 2147. ब्रह्माण्डपुराणम.

BRAHMĀṆḌAPURĀṆAM.

Substance, paper. Size, $10\frac{3}{4} \times 8\frac{1}{2}$ inches. Pages, 299. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

This contains 20 Adhyāyas of the Mantrabhāga, and 23 Adhyāyas of the Mantrakhaṇḍa.

Beginning of Mantrabhāga:

श्रीकन्धरं महात्मानं जलजारिधरं विभुम् ।
वृषाकपायीप्राणेशं वृषाकपिमुपास्महे ॥
गङ्गातीरे महात्मानं शौनकादिमहर्षयः ।
द्वादशाब्दक्रतोः काले नैमिशारण्यवासिनः ॥
सूतेन सर्वाश्च कथाः शृण्वन्तो हृष्टमानसाः ।
तं प्रसङ्गवशात्सूतमूचुः प्राञ्जलयः क्वचित् ॥
भवता कथितं सूत चतुर्वर्णाश्रमोचितम् ।
कर्म कार्यमकार्यञ्च तदुत्पत्तेश्च वर्णिता ॥
इतरा बहुवर्णानां जातयो भुवि विश्रुताः ।
तासान्तु मुक्तजातीयाः कीदृशाकारसंभवाः ॥
का वृत्तिश्चैव को देव[ः]स्तेषां यत्कर्म विश्रुतम् ।
तत्सर्वं कृपया ब्रूहि शिष्याणां नो महामते ॥

End:

सर्वबन्धविनिर्मुक्तास्ते सर्वैश्वर्यवर्धिताः ।
एतत्पुराणवक्तारं सर्वभूषाम्बरादिभिः ॥
संभावयेरन् श्रोतारो मुक्तर्षिकुलजातयः ।
इत्येवं वः कथां सर्वां मुक्तर्षेः कथिता मया ॥
इति शौनकमुख्येभ्यो मुनिभ्यो रौमहार्षणिः ।
कथयामास तत्सर्वं मुक्तर्षेश्चरितं महत् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे मुक्तर्षिवंशानुकीर्तने व्यास-युधिष्ठिरसंवादे एतत्पुराणश्रवणफलकथनं नाम विंशोऽध्यायः ॥

Beginning of Mantrakhaṇḍa :—

अतिधीरो महानल्पो दयालुरतिसुन्दरः ।
धार्मिको जानकीजानिः करोतु मम मङ्गलम् ॥

श्रीशौनकः—

आष्यावं (आर्षाणि) भवता सूत म(ा)हात्म्यानि बहूनि च ।
मन्त्राणां देवतानां च म(ा)हात्म्यानि शृ(श्रु)तानि च ॥
नारायणं नारसिंहं गोपालं सर्वसिद्धिदम् ।
वासुदेवं महामन्त्रं वाराहं ज्ञानदंनृणाम् ॥

End:

विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥
राज्यार्थी लभते राज्यं प्राप्नोति द्विजसत्तम ॥
श्रुत्वा विप्रमुखान्नित्यं वाचकं पूजयेत्सुधीः ।
गोभूमिस्वर्णमाणिक्यैर्वासोभिर्विविधैस्तथा ॥
यः शृणोति नरो भक्त्या रामसायुज्यमाप्नुयात् ।

Colophon:

इति श्रीब्रह्माण्डपुराणे उत्तरभागे मन्त्रखण्डे युधिष्ठिरनारदसंवादे तारकब्रह्ममाहात्म्यं नाम त्रयोविंशोऽध्यायः ॥

No. 2148. ब्रह्माण्डपुराणम्.

BRAHMĀṆḌAPURĀṆAM.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 540. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

This contains Arthapañcakavivaraṇakhaṇḍa 1*a*, Śrīraṅga-māhātmya—10 Adhyāyas, 63*a*; Vēṅkaṭagirimāhātmya—10 Adhyāyas, 81*a*; Lalitōpākhyāna—Adhyāyas 32, 98*a*; Mantrakhaṇḍa-Adhyāyas 23, 226*a*.

No. 2149. ब्रह्माण्डपुराणम्.

BRAHMĀṆḌAPURĀṆAM.

Substance, palm-leaf (Śrītāla). Size, $19\frac{3}{4} \times 2\frac{3}{8}$ inches. Pages, 80. Lines, 13 on a page. Character, Grantha. Condition, fair. Appearance, old.

Contains 30 Adhyāyas in Arthapañcakavivaraṇa, which treats of the five essentials of a religion, viz, स्वस्वरूप, परस्वरूप, उपाय स्वरूप, फलस्वरूप, and विरोधिस्वरूप.

Beginning :

श्रुतिस्मृतिनदीपूर्णं शास्त्रकल्लोलसङ्कुलम् ।
विष्णुभक्त्युदकं शुद्धं वन्दे विखनसार्णवम् ॥

ऋषयः—

वेदव्यासस्य महतो मुनेर्भगवतः प्रिय ।
सूत तत्त्वविदां श्रेष्ठ सर्वशास्त्रविशारद ॥
श्रुतिस्मृतिपुराणेतिहासार्थविदुषां वर ।
सर्वागमरहस्यांश्च वेत्सि त्वं नात्र संशयः

* * * *

वयन्त्वां परिपृच्छामो रहस्यार्थविदां वर ।
सर्वलोकोपकारार्थं सुलभान्मोक्षसाधनम् ॥
विप्रादिसर्ववर्णानां स्त्रीणाञ्चैव महामते ।
ज्ञानिनां ज्ञानशून्यानां सर्वाश्रमवतामपि ॥
वाङ्मात्रेणैव दृष्ट्यैव परिक्रमणमात्रतः ।
पूजया च नमस्कारान्मोक्षमार्गं सुदुर्लभम् ॥
अस्ति चेद्वद धर्मज्ञ रहस्यार्थेषु सांप्रतम् ।
एवं भगवतो धर्मान् रहस्यान्मुक्तिदान् शुभान् ॥
पप्र(संपृ)च्छतो मुनीन्वीक्ष्य संप्रहृष्टोऽब्रवीत्तदा ।

सूतः—

साधु साधु महाभागाः सर्वलोकहितैषिभिः ।
सम्यक् पृष्टस्त्वयं प्रश्नो युष्माभिर्मोक्षकाङ्क्षिभिः ॥

अयमेव महाप्रश्नो विष्णोश्च परमात्मनः ।
उपासनं सूचयति धन्या यूयं सुभाषिणः ॥

उपासनं परं धर्मं पृच्छन्ति कथयन्ति ये ।
ज्ञानविज्ञानसंपन्नास्ते वै वेदान्तवेदिनः ॥

उपासनं परं धर्मं वेदान्तेषु सुनिश्चितम् ।
तस्मान्नास्ति मुनिश्रेष्ठाः परमं मोक्षसाधनम् ॥

धर्ममर्थञ्च कामञ्च मोक्षञ्च सुलभाद्भुवि ।
उपासनात्प्राप्नुवन्ति स्वरूपञ्च हरेः पदम् ॥

उपासका ह्येव लोके श्रेष्ठास्सर्वमतेषु च ।
तेषां नास्ति समो लोके सर्ववेदेषु वा बुधाः ॥

एवं ब्रुवाणं तं सूतं ब्रह्मणः परमात्मनः ।
उपासकान(ां) पप्रच्छुर्लक्षणं मुनिपुङ्गवाः ॥

End:

निषिद्धकर्मकारी च अविश्वासी स्वसाधने ।
पुरुषार्थविरोधी तु कैङ्कर्येतरकाङ्क्षितः ॥

चतुर्णामिह वै तेषां विरोधं यः करोति च ।
स वै प्राप्तविरोधीति प्रोच्यते मुनिसत्तम ॥

अर्थपञ्चकविज्ञानमेतद्वै मुनिपुङ्गव ।
एतद्विज्ञानवान् मुक्तो भविष्यति न संशयः ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे अर्थपञ्चकविवरणं नाम त्रिंशोऽध्यायः ॥

परीधाविनामसंवत्सरे चैत्रमासे वैखानसेन कोण्डयार्यपुत्रेण वङ्गट्टाया-भिधानेन लिखितं ब्रह्माण्डपुराणम् ॥

No. 2150. ब्रह्माण्डपुराणम्.

BRAHMĀṆḌAPURĀṆAM.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 112. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, not new.

Adhyāyas 1 to 20, complete, and the 21st, incomplete in the Arthapañcakavivaraṇa.

No. 2151. ब्रह्माण्डपुराणम्.

BRAHMĀṆḌAPURĀṆAM.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 124. Lines, 6 on a page. Character, Grantha and Kanarese. Condition, good. Appearance, old. First leaf is lost.

Kṣētramāhātmyakhaṇḍa, Adhyāyas 1 to 12.

No. 2152. ब्रह्माण्डपुराणम्.

BRAHMĀṆḌAPURĀṆAM.

Substance, palm-leaf Size, 11⅝ × 1⅛ inches. Pages, 240. Lines, 5 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Kṣētramāhātmyakhaṇḍa; breaks off in the 12th Adhyāya.

No. 2153. अध्यात्मरामायणम्.

ADHYĀTMARĀMĀYAṆAM.

Substance, paper. Size, 12 × 8 inches. Pages, 485. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Adhyātmarāmāyaṇavyākhyā fol. 244*a*.

Complete.

This is a portion of the Brahmāṇḍapurāṇa, and treats of the story of Rāma as an incarnation of God in 7 Kāṇḍas. The 61st

Adhyāya of the Uttarakhaṇḍa of the Brahmāṇḍapurāṇa, which introduces the subject of the Adhyātmarāmāyaṇa, is herein given first.

Beginning :

अप्रमेयत्रयातीतनिर्मलज्ञानमूर्तये ।
मनोगिरां विदूराय दक्षिणामूर्तये नमः ॥

सूत उवाच—

कदाचिन्नारदो [भ्या]योगी परानुग्रहवाञ्छया ।
पर्यटन् सकलान् लोकान् सत्यलोकमुपागमत् ॥
तत्र दृष्ट्वा मूर्तिमद्भिश्छन्दोभिः परिवेष्टितम् ।
बालार्कप्रभया सम्यग्भासयन्तं सभागृहम् ॥
मार्कण्डेयादिमुनिभिः स्तूयमानं मुहुर्मुहुः ।
सर्वार्थगोचरज्ञानं सरस्वत्या समन्वितम् ॥
चतुर्मुखं जगन्नाथं भक्ताभीष्टफलप्रदम् ।
प्रणम्य दण्डवद्भक्त्या तुष्टाव मुनिपुङ्गवः ॥
सन्तुष्टस्तं मुनिं प्राह स्वयंभूर्वैष्णवोत्तमम् ।
किं प्रष्टुकामस्त्वमसि तद्वदिष्यामि ते मुने ॥
इत्याकर्ण्य वचस्तस्य मुनिर्ब्रह्माणमब्रवीत् ।
त्वत्तः श्रुतं मया सर्वं पूर्वमेव शुभाशुभम् ॥
इदानीमेकमेवास्ति श्रोतव्यं सुरसत्तम ।
तद्रहस्यमपि ब्रूहि यदि तेऽनुग्रहो मयि ॥
प्राप्ते कलियुगे घोरे नराः पुण्यविवर्जिताः ।
दुराचाररतास्सर्वे सत्यवार्तापराङ्मुखाः ॥

* * * *

एतेषां नष्टबुद्धीनां परलोकः कथं भवेत् ॥
इति चिन्ताकुलं चित्तं जायते मम सन्ततम् ।
लघूपायेन येनैषां परलोकगतिर्भवेत् ॥
तमुपायमुपाख्याहि सर्वं वेत्ति यतो भवान् ।
इत्यर्षे(त्यृषे)र्वाक्यमाकर्ण्य प्रत्युवाचाम्बुजासनः ॥
साधु पृष्टं त्वया साधो वक्ष्ये तच्छृणु सादरम् ।
पुरा त्रिपुरहन्तारं पार्वती भक्तवत्सला ॥
श्रीरामतत्त्वं जिज्ञासुः पप्रच्छ विनयान्विता ।
प्रियायै गिरिशस्तस्मै(स्यै) गूढं व्याख्यातवान् स्वयम् ॥
पुराणोत्तममध्यात्मरामायणमिति स्मृतम् ।
तत्पार्वती जगद्धात्री पूजयित्वा दिवानिशम् ॥
आलोचयन्ती स्वानन्दमग्ना तिष्ठति सांप्रतम् ।
प्रचरिष्यति तल्लोके प्राण्य[ा]दृष्टवशाद्यदा ॥
तस्याध्ययनमात्रेण जना यास्यन्ति सद्गतिम् ।
तावद्विजृम्भते पापं ब्रह्महत्यापुरस्सरम् ॥

End:

अध्यात्मरामं पठतश्च नित्यं श्रोतुश्च भक्त्या लिखतश्च रामः ।
अतिप्रसन्नश्च सदा समीपे सीतासमेतः श्रियमातनोति ॥
रामायणं जनमनोहरमादिकाव्यं ब्रह्मादिभिस्सुरवरैरपि संस्तुतश्च ।
शुध्य(श्रद्धा)न्वितः पठति यः शृणुयात्स नित्यं विष्णोः स्व(प्र)याति
सदनं सुविशुद्धदेहः ॥

Colophon:

इति श्रीमदध्यात्मरामायणे उत्तरकाण्डे उमामहेश्वरसंवादे श्रीराम-वैकुण्ठप्रवेशन्ना(शो ना)म नवमस्सर्गः ॥

अध्यात्मोत्तरकाण्डे सर्गा ग्रहसंख्यया परिक्लृप्ताः ।
ऋतुशतसंख्याः श्लोकाः पुराणसंख्याः पुरहरेणोक्ताः ॥
पार्वत्यै परमेश्वरेण गदिते ह्यध्यात्मरामायणे
काण्डैस्सप्तभिरन्विते ऽतिशुभदे सर्गाश्चतुष्षष्टिकाः ।
श्लोकानान्तु शतद्वयेन सहितास्सूक्तानि चत्वारि[णी]
सहस्राण्यैव समासतश्श्रुतिशतेषूक्तानि तत्त्वार्थतः ॥
काण्डोऽयं समाप्तः ॥

No. **2154.** अध्यात्मरामायणम्.

ADHYĀTMARĀMĀYAṆAM.

Substance, paper. Size, 12¼ × 8 inches. Pages, 236. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 446*b*. The other work herein is Vāyupurāṇa 1*a*.

From the beginning to the middle of the 5th Sarga of the Sundara-Kāṇḍa.

Beginning:

वागीशाद्याः सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्यास्स्युस्तं नमामि गजाननम् ॥
यः पृथ्वीभरवारणाय दिविजैस्संप्रार्थितश्चिन्मयः
सञ्जातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः ।
निश्चक्रं हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां
कीर्तिं पापहरां विधाय जगतां तज्जानकीशं भजे ॥

विश्वोद्भवस्थितिलयादिषु हेतुमेकं
मायाश्रयं विगतमायमचिन्त्यमूर्तिम् ।
आनन्दसान्द्रममलं निजबोधरूपं
सीतापतिं विदिततत्त्वमहं नमामि ॥

पठन्ति ये नित्यमनन्यचेतसा शृण्वन्ति चाध्यात्मिकसंज्ञितं शुभम् ।
रामायणं सर्वपुराणसंमतं निर्धूतपापा हरिमेव यान्ति ते ॥

अध्यात्मरामायणमेव नित्यं पठेद्यदीच्छेद्भवबन्धमुक्तिम् ।
गवां सहस्रायुतकोटिदानात् फलं लभेद्यः शृणुयात्स मर्त्यः ॥

पुरारिगिरिसंभूत(ा)श्रीरामार्णवसङ्गता ।
अध्यात्मरामगङ्गेयं पुनाति भुवनत्रयम् ॥

End:

यन्नामसंस्मरणधूतसमस्तपापाः तापत्रयानलमपीह तरन्ति सद्यः.।
तस्यैव किं रघुवरस्य विशिष्टदूतः संतप्यते कथमसौ प्रकृतानवे(ले)न ॥

Colophon:

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे विश्वामित्रप्रोक्ते सुन्दरकाण्डे चतुर्थस्सर्गः ॥

ततस्सीतां नमस्कृत्वा हनुमानब्रवीद्वचः ।
आज्ञापयस्व मां देवि भवत्या रामसन्निधिम् ॥

* * * *

क्षुधितास्स्मो वयं वीर देह्यनुज्ञां महामते ।
भक्षयाम्य(म): फलान्यद्य त्वरितं हरिसत्तमाः ॥

ततः प्रविश्य हरयः पातुम्.

No. 2155. अध्यात्मरामायणम्.

ADHYĀTMARĀMĀYAṆAM.

Substance, palm-leaf. Size, 9⅜ × 1⅜ inches. Pages, 46. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 37*a*. The other works herein are Gīāgōvinda-vyākhyā 1*a*, Mahimnasstava 32*a*, Nāṭyavēda 60*a*.

Sundara-Kāṇḍa, complete.

Same as the above.

No. 2156. अध्यात्मरामायणम्.

ADHYĀTMARĀMĀYAṆAM.

Substance, palm-leaf. Size, 16⅜ × 1¼ inches. Pages, 90. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old

From the 3rd Sarga of the Ayōdhyā-Kāṇḍa to the end of the 8th Sarga in the Āraṇya-Kāṇḍa.

Same as the above.

No. 2157. अध्यात्मरामायणम्.

ADHYĀTMARĀMĀYAṆAM.

Substance, paper. Size, 7⅝ × 4⅝ inches. Pages, 24. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the 13th Sarga of the Yuddha-Kāṇḍa and the 4th Sarga of the Āraṇya-Kāṇḍa.

Copied by Tēkumalla Vīrarāghavalu for Tadakamalla Veṅka-tannapantulu.

Same as the above.

No. 2158. अध्यात्मरामायणव्याख्या.

ADHYĀTMARĀMĀYAṆAVYĀKHYĀ.

Pages, 245. Lines, 21 on a page.

Begins on fol. 244*a* of the MS. described under No. 2153.

From the beginning to the end of the Yuddhakāṇḍa.

This commentary on the Adhyātmarāmāyaṇa is by Rāmavarman, king of Śṛṅgibērapura, son of Himmativarman and pupil and patron of Nāgēśabhaṭṭa, and is called Adhyātmarāmāyaṇa-Sētu.

Beginning :

वामे भूमिसुता पुरस्तु हनुमान्पश्चात्सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वव्यकोणेषु च ।
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्
मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम् ॥
दिनेशवंशजलधौ पूर्ण[ः]शीतकरोपमः ।
प्रजाह्लादकरो विष्णुभूषणः कौस्तुभो वरः ॥

अत्र विष्णुभूषणत्वेन परमभक्ततया सदा भगवद्धृदयारूढता[स्स] ध्वनिता[ः] ।

नाम्ना हिम्मतिवर्माभूद्धैर्येण हिमवानिव ।
रूपेण जितकन्दर्पः क्षमायां क्षमया समः ॥
पराक्रमैर्जितस्साक्षात्तेजसा भानुमानिव ।
भूपानां भ्रष्टराज्यानां पुरा राज्यप्रदायकः ॥
यं दृष्ट्वार्थिसमूहस्य जातेयं निश्चिता मतिः ।
हित्वा पशुत्वं स्त्रीत्वञ्च कामधुग्भूमिमागता ॥
तस्माज्जातो रामदत्तश्चन्द्राच्चन्द्र इवापरः ।
मित्राणाञ्च रिपूणाञ्च मानदः प्रथितः प्रभुः ॥
मानदो मानदाता(वित्ता)नां दुष्टानां मानखण्डनः ।
आसमुद्रा क्षमादेवी यत्कीर्त्या धवलीकृता ॥

हिमाचलेन समतां नीतास्सप्तापि चाचलाः ।
यद्दानाम्बुप्रवाहेण मेघोदस्यानपेक्षकाः ॥
कृषीवलाः प्रतिदिशं प्रहृष्यन्ति दिनेदिने ।
तेन श्रीरामभक्तेन सर्वा विद्याः प्रजानता ॥
शृङ्गिबेरपुरेशेन रिपुव(क)क्षदवाग्निना ।
अर्थिनां कल्पवृक्षेण विद्वज्जनसभासदा ॥
भट्टनागेशशिष्येण बध्यते रामवर्मणा ।
प्रणम्य जानकीजानिं रामं कामातिसुन्दरम् ॥
चापबाणधरं देवं मायामानुषविग्रहम् ।
सेतुः परोपकृतयेऽध्यात्मरामायणाम्बुधौ ॥
सुशब्दमणिभिः श्लक्ष्णैः प्रीयतां तेन राघवः ।

श्रीमता वाल्मीकिना लोकोद्धाराय च कृते रामचरित्रवर्णनरूपे रामायणाख्यकाव्ये भगवतो लीलावतारस्य रावणादीनां दृढमनुष्यत्वबुद्धये नटवदात्मस्वरूपगोपनेन व्यवहरतः स्वरूपं वाल्मीकिना गुप्तमेव तत्र तत्र निरूपितः (म्) । तदेतत्परमदयालुः भगवान् साक्षाद्वेदव्यासो लोकानां स्फुटं बोधयितुं नारदब्रह्मसंवादरूपेण ब्रह्माण्डपुराणे अध्यात्मरामायणाख्यसंहितां चक्रे । तस्याश्च वाल्मीकिसूचितार्थज्ञापकत्वं बोधयितुं वाल्मीकिरामायणवदेव काण्डसर्गोपेततया कृतां यथामति स्वमतिदोषशुद्धये व्याचक्ष्महे । तामेतां संहितां नैमिषेऽरण्ये नैमिषेयानृषीन् श्रावयाते स्म सूत इत्याह—अप्रमेयेति । अप्रमेयं त्वयं मायाजीवेश्वररूपं तदतीतस्ततोऽधिकश्चासौ । निर्मलं ज्ञानं तत्स्वरूपाय नम इति वाङ्मनसामगोचरायेत्यर्थः ।

End:

यो भूतेश्वरः भवः शिवः असकृत् अखिलवेदराशिम् आलोड्य तारकं ब्रह्म तदेव रामः विष्णुरहस्यमूर्तिषु अत्यन्तरहस्यमूर्तिः मुख्या

मूर्तिरिति विज्ञाय अखिलवेदानां सारभूता उपनिषत् अर्थसंग्रहम् उद्धृत्य संक्षेपत इदं रामस्य निगूढतत्त्वं प्रियायै प्राह। तस्मै। नम इति शेषः।

अयं श्लोकस्तत्रत्यश्रोतुः शिवशिष्यस्येति बोध्यम् ॥

Colophon:

इति श्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमानस्य हिम्मतिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतौ अध्यात्मरामायणसेतौ युद्धकाण्डे षोडशोऽध्यायः ॥

No. 2159. ब्राह्मपुराणम्.

BRĀHMAPURĀṆAM.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 338. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 96, complete ; 97th incomplete.

Adhyāyas 1 to 90 herein correspond to Adhyāyas 70 to 174 in the work as published in the Ānandāśrama Sanskrit Series. Adhyāyas 91 to 96 are not, however, to be found in that edition. This portion is here called Gautamīmāhātmya,in which the holiness of certain sacred rivers and tanks are described. The word Gautamī here means the river Gōdāvarī.

Beginning:

तपसां यज्ञदानानां तीर्थानां पावनं शुभम् ।
इति श्रुतं मया त्वत्तस्तीर्थानां चरितं पुनः ॥
श्रोतुमिच्छामि तत्सर्वं वद स त्वं सुरेश्वर ।
सर्वेषामेव धर्माणां तीर्थमाहात्म्यमुच्यते ॥

ब्रह्मोवाच—

चतुर्विधानि तीर्थानि मुने वक्ष्यामि तत्त्वतः ।
शृणुष्व मुनिशार्दूल दैवतान्यासुराणि च ॥

मानुषाणि च लोकेऽस्मिन् विख्यातानि सुरादिभिः ।
मनुष्येभ्यश्च तीर्थेभ्य आरु(र्)षं बहुपुण्यदम् ॥
आरु(र्)षेभ्यश्च तीर्थेभ्य आसुरं पुण्यमुच्यते ।
आसुरेभ्यश्च तीर्थेभ्यः दैवतं पुण्यमुच्यते ॥
यदेकं जायते तत्र नास्मात्तीर्थात्परं विदुः ।
त्रयाणामपि लोकानां तीर्थमाहात्म्यमुत्तमम् ॥
तत्रापि जाम्बवं द्वीपं त्रिषु लोकेषु विश्रुतम् ।
मर्त्यलोके च तत्सर्वं तीर्थं बहुगुणोदयम् ।

End:

ते राक्षसा महाशूराः लोकोपद्रवकारकाः ।
वसिष्ठमुनिना विप्रा(ः) प्रार्थितो भगवान् स्वयम् ॥
पादाभ्यामु(मा)जघानाशु नाशं यान्ति क्षणेन च ।
वेद्यामन्तःप्रविष्टत्वादत(न्त)र्वेरि(दी)ति विश्रुताः ॥

Colophon:

इति श्रीगौतमीमाहात्म्ये अन्तर्वेदिमहिमानुवर्णनं नाम षण्णवतितमोऽध्यायः ॥

नारदः—

ब्रह्मन् ब्रह्मविदां श्रेष्ठ[ः] सर्वभूतदयापरे(र) ।
संवदस्व महाभाग दैत्यानाश्चरितं शुभम् ॥
देवेश्वरो हरिश्श्रीमान् दैत्यानां वल्लभो हि सः ।
कथं विनाशयामास कुमाराणां त्रयं स्वयम् ॥

* * * *

वापीकूपसमायुक्तां तटाकवरशोभिताम् ।
हेमप्र(ा)कारसंयुक्तां चामीकरगृहोज्ज्वलाम् ॥

भेरीमृदङ्गपणवशङ्खकाहलनादिताम् ।
क्रिडाशैलसमायुक्तां लतागृहविराजिताम् ॥

No. 2160. कलियुगराजवृत्तान्तः.

KALIYUGARĀJAVṚTTĀNTAḤ.

Substance, palm-leaf (Śrītāla). Size, 9⅝ × 2 inches. Pages, 205. Lines, 7 on a page. Character, Malayalam. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Skāndapurāṇa (Jambūdvīpōdbhava) fol. 104*a*, Mairāvaṇacaritam 210*a*.

26 Adhyāyas, complete; 27th breaks off in the Phalaśruti the end.

This is a portion of the Bhaviṣyōttarapurāṇa treating of the genealogy, and giving an account, of the kings ruling in India in at the Kaliyuga.

Beginning:

गजाननं फालकलेन्दुभूषणं समस्तदेवार्षिसमर्चिताङ्घ्रिम् ।
नमामि विघ्नच्छिदमाशु भक्तसन्मानसासीनमनन्तसिद्धिदम् ॥

ऋषय ऊचुः—

सूत सूत महाबुद्धे भूतभव्यार्थवित्तम ।
कल्यादौ द्वापरान्ते च ये नृपाः पृथिवीभुजः ॥
वर्तमाना भविष्या वा तान्नो विस्तरतो वद ।
निःक्षत्रिया वसुमती कलावाद्यन्तयोः स्थितिः ॥
इत्येवं शास्त्रसिद्धान्तः के राजानो भवन्ति वै ।

* * * *

कावेर्यास्तीरयोः क्षेत्रे चक्रे ब्राह्मणभोजनम् ।
षड्रसैर्भक्ष्यभोज्यैश्च स चक्रे कोटिसङ्ख्यकम् ॥
एवं निनाय दारैश्च द्वादशाब्दान्य(न)सौ नृपः ।
कावागत्य नृपं स्वप्ने ऊचतुर्द्विजदम्पती ॥

Colophon :

इति श्रीभविष्योत्तरे पुराणे सुन्दरचोळचरिते षड्विंशोऽध्यायः ॥

End :

पुनश्च शिवलोकाय ययुस्सर्वे नृपोत्तमाः ।
चोळेन्द्राश्शिवभक्ताग्र्या भस्मरुद्राक्षधारिणः ॥
कलौ वर्षसहस्रान्ते परिपाल्य वसुन्धराम् ।
ते गताश्शिवसारूप्यं पुण्यश्लोका नृपोत्तमाः ।
तदेषाश्चरितं श्रुत्वा सर्वपापैः प्रमुच्यते ।

No. 2161. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, 20½ × 1½ inches. Pages, 549. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete in 12 Skandhas.

This is, according to one tradition, one of the Mahāpurāṇas. It treats in 12 Skandhas mainly of the incarnations of Viṣṇu, giving prominence to his incarnation as Kṛṣṇa, whose story is mostly contained in the 10th Skandha. It is the Purāṇa which is held to be authoritative by the Bhāgavatas in particular and by all the other Vaiṣṇava sects more or less.

No. 2162. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf (Śrītāla). Size, 12¾ × 1⅞ inches. Pages, 344. Lines, 18 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same as the above.

The MS. is dated 14th of Bhādrapada-Śuddha in the year Śārvari.

No. 2163. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 372. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Skandhas 1 to 5.

Same as the above.

No. 2164. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 270. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Skandhas 1 to 4 and 6. Many leaves are lost in the middle.

Same as the above.

No. 2165. भागवतम्.

BHĀGAVATAM.

Substance, paper. Size, 11½ × 7⅝ inches. Pages, 573. Lines, 17 on a page. Character, Telugu. Condition, fair. Appearance, old.

Skandhas 1 to 4.

Same as the above.

No. 2166. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, 17⅝ × 1½ inches. Pages, 287. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Āturasannyāsavidhi 145*a*.

Skandhas 1 to 3, complete; 4th Skandha, breaks off in the 23rd Adhyāya.

No. 2167. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, 16¾ × 1⅜ inches. Pages, 180. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Skandhas 1 (Adhyāyas 5 to 19), 2 and 3.

Same as the above.

No. 2168. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, 13¼ × 1½ inches. Pages, 110. Lines, 7 on a page. Character, Kanarese. Condition, injured. Appearance, old.

First Skandha, complete. Second Skandha breaks off in the 8th Adhyāya.

Same as the above.

No. 2169. भागवतम्.

BHĀGAVATAM.

Substance, paper. Size, 9½ × 7½ inches. Pages, 29. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

First Skandha; breaks off in the 7th Adhyāya.

Same as the above.

No. 2170. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 140. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

4th Skandha, complete.

No. 2171. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 122. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vivāhaprayōga 62*a*.

4th Skandha, complete.

No. 2172. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, 18⅝ × 1⅝ inches. Pages, 128. Lines, 10 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Skandhas 4, 5 and 6; the last one here breaks off in the 12th Adhyāya.

Same as the above.

No. 2173. भागवतम्.

BHĀGAVATAM.

Substance, paper. Size, 11½ × 7⅛ inches. Pages, 444. Lines, 17 on a page. Character, Telugu. Condition, fair. Appearance, old.

Skandhas 5 to 9.

Same as the above.

No. 2174. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf (Śrītāla). Size, $14\frac{1}{4} \times 2\frac{1}{8}$ inches. Pages, 24. Lines, 11 on a page. Character, Grantha. Condition, good. Appearance, old.

Skandha 5, Adhyāyas 24 to 26, and Skandha 6, breaking off in the 5th Adhyāya.

Same as the above.

No. 2175. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 225. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the 5th Skandha, 6th Skandha (Adhyāyas 1 to 12), 7th Skandha, 9th Skandha (Adhyāyas 1 to 23) and the 12th Skandha.

Same as the above.

No. 2176. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, $15 \times 1\frac{5}{8}$ inches. Pages, 248. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Bhāgavatavyākhyā 125 *a*.

Skandhas 6 to 9.

Same as the above.

The MS. is dated: 2nd Kārtika in Manmatha year; and is said to have been copied by Viśvanātha.

No. 2177. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 135. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Skandhas 6 and 7, complete.

No. 2178. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, $15 \times 1\frac{1}{2}$ inches. Pages, 61. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Eighth Skandha, complete, 1, 2 and 3 Adhyāyas being imperfect.

Same as the above.

No. 2179. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 48. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, new.

Skandha 9, complete.

Same as the above.

No. 2180. भागवतम्.

BHĀGAVATAM

Substance, paper. Size, $10\frac{1}{2} \times 7$ inches. Pages, 454. Lines, 16 on a page. Character, Telugu. Condition, fair. Appearance, old.

Tenth Skandha, complete.

Same as the above.

No. 2181. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 266. Lines, 8 on a page. Character, Telugu. Conditon, good. Appearance, old.

Skandha 10, complete.

Same as the above.

No. 2182. भागवतम्.

BHĀGAVATAM.

Substance, paper. Size, 10 × 5½ inches. Pages, 280. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, old.

Skandha 10, complete.

Same as the above.

The MS. is dated : Āṣāḍha-Śuddha of Parīdhāvin year.

Copyist's name given as Rāmuḍu ; and he gave the MS. to Koṇḍavalli Śrīnivāsa.

No. 2183. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf (Śrītāla). Size, 19½ × 2¼ inches. Pages, 114 Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, old.

10th Skandha, complete in 91 Adhyāyas instead of the usual 90 Adhyāyas.

Same as the above.

No. 2184. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 268. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Skandha 10, complete in 91 Adhyāyas.

Same as the above.

No. **2185.** भागवतम्.

BHĀGAVATAM.

Substance, paper. Size, $9\frac{3}{4} \times 7\frac{1}{2}$ inches. Pages, 453. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Vol. I contains Adhyāyas 1 to 46; and vol. II, from 47 to the end, of the 10th Skandha.

Same as the above.

No. **2186.** भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 120. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old

Begins on fol. 133*a*. The other work herein is Bhāgavatatātparyacandrikā 1*a*.

Skandha 10, Adhyāyas 1 to 40.

Same as the above.

No. **2187.** भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, $19 \times 1\frac{1}{2}$ inches. Pages, 116. Lines, 11 on a page. Character, Grantha. Condition, good. Appearance, new.

Skandha 10, breaks off in the 40th Adhyāya.

No. **2188.** भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf (Śrītāla). Size, $13\frac{3}{8} \times 2$ inches. Pages, 280. Lines, 10 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Bhāgavatatātparya 143*a*.

Skandha 10, complete. Wants two leaves in the beginning.

No. 2189. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, $19\frac{1}{8} \times 1\frac{4}{8}$ inches. Pages, 216. Lines, 11 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 2 to 95 in the 10th Skandha; the 2nd Adhyāya wants beginning.

No. 2190. भागवतम्.

BHĀGAVATAM.

Substance, paper. Size, $5\frac{1}{8} \times 3\frac{1}{8}$ inches. Pages, 8. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 3*a*. The other work herein is Viṣṇupañjarakavaca 1.

The 32nd Adhyāya of the 10th Skandha, complete.

No. 2191. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, $18 \times 1\frac{3}{8}$ inches. Pages, 36. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 4*a*. The other works herein are Vṛṣādristōtra 1*a*, Yādavagirimāhātmya 22*a*, Hayagrīvagāyatrīmantra 62*a*, Viṣṇudharmōttara 64*a*.

Adhyāyas 82, 63, 64, and 38 to 44 (the last incomplete); in the 10th Skandha.

Same as the above.

No 2192. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, $18\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 378. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Skandhas 10 to 12, complete.

Same as the above.

Said to have been copied by a certain Śṛṅgāra-Kaviliṅga.

No. 2193. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, $17 \times 1\frac{1}{4}$ inches. Pages, 104. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Skandhas 11 and 12, the latter breaking off in the 8th Adhyāya.

Same as the above.

No. 2194. भागवतम्.

BHĀGAVATAM.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 130. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Eleventh Skandha, complete.

No. 2195. भागवतम्.

BHĀGAVATAM.

Pages, 102. Lines, 16 on a page.

Skandhas 11 and 12.

Begins on fol. 59*a*. of the MS. described under No. 2043.

Same as the above.

No. 2196. भागवतम्.
BHĀGAVATAM.

Substance, paper. Size, 12⅛ × 7⅛ inches. Pages, 53. Lines, 14 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Skandha 12th, complete.

Same work as the above.

No. 2197. भागवतम्.
BHĀGAVATAM.

Substance, paper. Size, 9⅝ × 5⅛ inches. Pages, 100. Lines, 12 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Some Adhyāyas from the 2nd, 3rd, 7th, 8th, 9th, 10th and 11th Skandhas.

No. 2198. भागवतम्.
BHĀGAVATAM.

Substance, palm-leaf. Size, 17⅛ × 1⅛ inches. Pages, 15. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Aghapañcaşaşti Savyākhyā 9*a*.

A collection of passages taken from the various Skandhas of the Bhāgavata.

No. 2199. भागवतम्—सव्याख्यानम्.
BHĀGAVATAM WITH COMMENTARY.

Substance, paper. Size, 12⅝ × 7⅛ inches. Pages, 1,490. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, new.

Bound in 2 volumes.

Vol I, having 818 pages, contains Skandhas 1 to 9; and Vol. II contains Skandhas 10 to 12 and has 672 pages.

The text with the commentary called Bhāvārthadīpikā by Śrīdharasvāmin.

Beginning:

(मू.)

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥

नैमिषे निमिषक्षेत्रे ऋषयः शौनकादयः ।
सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥

(व्या.)

नमश्श्रीपरमहंसास्वादितचरणकमलचिन्मकरन्दाय भक्तजनमानसनिवासाय श्रीरामचन्द्राय ।

वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि ।
यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे ॥

विश्वसर्गविसर्गादिनवलक्षणलक्षितम् ।
श्रीकृष्णाख्यं परन्धाम जगद्धाम नमामि तत् ॥

अत्र सर्गो विसर्गश्च स्थानं पोषणमूर्तयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥
माधवोमाधवावीशौ सर्वसिद्धिविधायिनौ ।
वन्दे परस्परात्मानौ परस्परनुतिप्रियौ ॥
संप्रदायानुरोधेन पौर्वापर्यानुसारतः ।
श्रीभागवतभावार्थदीपिकेयं प्रतन्यते ॥
काहं मन्दमतिः केदं मन्थनं क्षीरवारिधेः ।
किन्तत्र परमाणुर्वै यत्र मज्जति मन्दरः ॥
मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥
श्रीमद्भागवताभिधः सुरतरुस्ताराङ्कुरस्सज्जनिः
स्कन्धैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः ।
द्वात्रिंशत्रिशतश्च यस्य विलसच्छाखास्सहस्राण्यलं
पर्णान्यष्टदशेष्टदोऽतिसुलभो वर्वर्ति सर्वोपरि ॥

अथ नानापुराणशास्त्रप्रबन्धैश्चित्तप्रशान्तिमलभमानस्तत्र तत्रापरितुष्यन्नारदोपदेशतः श्रीमद्भगवद्गुणवर्णनप्रधानं श्रीभागवतशास्त्रं प्रारिप्सुर्वेदव्यासः तत्प्रतिपाद्यपरदेवतानुस्मरणलक्षणं मङ्गलमाचरति जन्माद्यस्येति । परं परमेश्वरं धीमहीति—ध्यायतेर्लिङ्; छान्दसं रूपं ध्यायेमेत्यर्थः । बहुवचनं शिष्याभिप्रायम् । तमेव स्वरूपतटस्थलक्षणाभ्यामुपलक्षयति तत्र स्वरूपलक्षणं सत्यमिति ॥

End :

(मू.)

भवे भवे यथा भक्तिः पादयोस्तव जायते ।
तथा कुरुष्व योगेश नाथस्त्वं मे यतः प्रभो ॥

नामसङ्कीर्तनं यस्य सर्वपापप्रणाशनम् ।
प्रणामो दुःखशमनस्तं नमामि हरिं परम् ॥

Colophon:

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां द्वादशस्कन्धे त्रयोदशोऽध्यायः ॥

(व्या.)

गायत्र्यैव यथोपक्रममुपसंहरन् गायत्र्याख्यब्रह्मविद्येयमिति दर्शयति। तमेव देवतारूपेण गुरुरूपेण च प्रणमति नम इति द्वाभ्यां व्याचचक्षे व्याख्यातवान् ।

भावार्थदीपिकामेतां भगवद्भक्तवत्सलाम् ।
श्रीपरानन्दपादाब्जभृङ्गश्रीः श्रीधरोऽकरोत् ॥
स्वबालचपलालापैः स्वलीलापरिनर्तितैः ।
प्रीयतां परमानन्दः नृहरिस्सद्गुरुस्स्वयम् ॥
श्रीपरानन्दसंप्रीत्यै गुह्यं भागवतं मया ।
विवृतं तन्मतेनेदं न तु मन्मतिवैभवात् ॥

Colophon:

इति श्रीभावार्थदीपिकायां श्रीधरस्वामिविरचितायां द्वादशस्कन्धे त्रयोदशोऽध्यायः ॥

द्वादशस्कन्धस्समाप्तः ॥

No. **2200.** भागवतम्—सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, paper. Size, (Vol. 1) $13\frac{1}{8} \times 7$ inches, (Vols. 2 and 3) $14\frac{5}{8} \times 5\frac{7}{8}$ inches. Pages, 2,496. Lines, 13 or 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Vol. I (696 pp.) contains Skandhas 1, 3, 6; Vol. II (800 pp.), Skandhas 2, 4, 5, 7, 8 and 9; and Vol. III (1,000 pp.), Skandhas 10 to 12.

Bhāvārthadīpikā.

Skandha 2 is dated: Thursday, the 2nd Pauṣa-Bahula in Saṁvat 1701.

Skandha 4 is dated: Monday, the 3rd Āṣāḍha-Bahula in Saṁvat 1702.

Skandha 5 is dated: Sunday, the 1st of Śrāvaṇa-Bahula in Saṁvat 1702.

Skandha 8 is dated: Sunday, the 2nd Phālguna-Bahula in 1701.

Skandha 9 is dated: Sunday, the 2nd Māgha-Śuddha in 1701.

Skandha 11 is dated: 1877.

Skandha 12 is dated: Friday the 11th of Bhādrapada-Śukla in 1702.

Said to have been copied by one Prāṇārāmacandra.

No. 2201. भागवतव्याख्या–भावार्थदीपिका.

BHĀGAVATAVYĀKHYĀ: BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, 18½ × 1⅝ inches. Pages, 400. Lines, 10 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Skandhas 1 to 10, complete.

Same work as the above.

No. 2202. भागवतम्–सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf (Śrītāla). Size, 19⅜ × 2¼ inches. Pages, 740. Lines, 14 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Skandhas 1 to 9 and 12.

Same work as the above.

The copyist adds at the end—

वाणीपुरनिवासेन अनन्ताख्यस्य सूनुना ।
सुब्रह्मण्येन लिखितं कृत्स्नं भागवतं शुभम् ॥

No. 2203. भागवतव्याख्या—भावार्थदीपिका.

BHĀGAVATAVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, $18\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 505. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Skandhas 1 to 4, complete ; 5th (14 Adhyāyas.)

Same work as the above.

Skandha 1 is dated : Tuesday, the 2nd of Aippaśi in the year Śukla.

Skandha 4 is dated : 1st of Āvaṇi in the year Pramōdūta.

The copyist adds—

Sk. 2 : इदं भागवतं पुण्यं सव्याख्यानं शुभप्रदम ।
रङ्गाचार्येण लिखितमात्रेयान्वयसूरिणा ॥

Sk. 3 : तृतीयस्कन्धमतुलं सव्याख्यानं सुदुर्लभम् ।
रङ्गाचार्येण लिखितमात्रेयान्वयसूरिणा ॥

Sk. 4 : आत्रेयवंशाम्बुधिपूर्णचन्द्रमतीतवाणीवचसः प्रभावम् ।
अज्ञानिनां ज्ञानदमात्मवन्तं वन्दे गुरुं वेङ्कटपादपङ्कजम् ॥

No. 2204. भागवतम्—सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf (Śrītāla). Size, $19\frac{5}{8} \times 2\frac{1}{2}$ inches. Pages, 330. Lines, 13 on a page. Character, Telugu. Condition, fair. Appearance, old.

Skandhas 1 to 4.

Same work as the above.

No. 2205. भागवतम्--सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 348. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Skandhas 1 and 2, complete.

Same work as the above.

No. 2206. भागवतम्--सव्याख्यानम्.

BHĀGAVATAM: WITH COMMENTARY.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 61. Lines, 12 on a page. Character, Grantha. Condition, injured. Appearance, old.

Adhyāyas 1 to 15 in the first Skandha.

Same work as the above.

No. 2207. भागवतव्याख्या--भावार्थदीपिका.

BHĀGAVATAVYĀKHYĀ: BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, $17\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 68. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Skandha 1, breaks off in the 5th Adhyāya.

Same work as the above.

No. 2208. भागवतम्--सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf. Size, $9\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 275. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Skandha 2, complete; and Skandha 3, Adhyāyas 26, 28, 32 and 33.

Same work as the above.

The MS. is dated as Raktākṣi year.

No. 2209. भागवतव्याख्या--भावार्थदीपिका.

BHĀGAVATAVYĀKHYĀ: BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, $19\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 400. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

From the 27th Adhyāya of the 3rd Skandha to the end of the 14th Adhyāya of the 8th Skandha, the 15th Adhyāya thereof being incomplete.

Same work as the above.

No. 2210. भागवतव्याख्या--भावार्थदीपिका.

BHĀGAVATAVYĀKHYĀ: BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 569. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Skandhas 4, 5, 6, 8, 9 and 10 (Adhyāyas 1 to 50)

Same work as the above.

The MS. is dated: Tuesday, the 14th of Caitra-Bahula in the year Sādhāraṇa; and 5th of Jyēṣṭha-śuddha in the same year.

No. 2211. भागवतम्--सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf (Śrītāla). Size, $19\frac{5}{8} \times 2\frac{1}{8}$ inches. Pages, 101. Lines, 15 on a page. Character, Grantha. Condition, fair. Appearance, old.

